12. Hafta

# वर्षाकालः

इदानीं वर्षाकालः। पश्य! आकाशं मेघैः सञ्छन्नम्। सर्वत्र वृष्टेः धाराः पतन्ति। जनाः स्वीयानि कर्माणि त्यक्त्वा गृहं गताः।

पक्षिणः शैत्येन पीडिताः वृक्षाणां शाखासु तिष्ठन्ति। कृषीवलाः परं क्षेत्राणि कर्षन्ति। ते कृष्टेषु क्षेत्रेषु धान्यानि वपन्ति।

वर्षाकाले कूपाः सरांसि च जलेन पूर्णानि भवन्ति।

नद्योऽपि कूलानि भञ्जयन्त्यः प्रवहन्ति। भूमौ सर्वत्र तृणानि उत्पद्यन्ते। वृक्षा लताश्च पल्लविताः भवन्ति।

त्वं कुत्र प्रस्थितः? अहम् आपणं प्रति प्रस्थितः। वृष्टिः खलु पतति, कथं गमिष्यसि? मम हस्ते छत्रं वर्तते। छत्रं जनान् आतपात् वृष्टेश्च रक्षति। अतः छत्रस्य आतपत्रं वर्षत्रं इति नाम।